# Shri Raghavendra Karunalahari

# શ્રીરાઘવેન્દ્રકરુણાલહરી

## Document Information

Text title : Raghavendra Karunalahari

File name : rAghavendrakaruNAlaharI.itx

Category : deities_misc, gurudev, laharI

Location : doc_deities_misc

Transliterated by : Sudeep Dalbanjan

Proofread by : Sudeep Dalbanjan

Latest update : August 25, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 25, 2024

*sanskritdocuments.org*

# શ્રીરાઘવેન્દ્રકરુણાલહરી

ત્વઙ્ગત્તુઙ્ગ-તરઙ્ગ-મઙ્ગલ-નદી-તુઙ્ગાન્તરઙ્ગ-સ્થલી-
રઙ્ગોત્સઙ્ગ-નિષઙ્ગિ-વાત-વિધુતામ્ભઃ પ્લાવિતે પાવિતે ।
શ્રીમન્ત્રાલય-નામ્નિ ધામ્નિ વસતે ચાશંસતે શં સતે
મન્ત્રાલોચનમાર્તિ-નાશન-કૃતે પુંસાં નમસ્તન્વતે ॥ ૧॥

નો મઞ્ચા ન ગૃહા ન ચઞ્ચલ-દૃશો દ્રવ્યં શ્રમાત્સઞ્ચિતં
ચઞ્ચત્ કિઞ્ચન કિઞ્ચ કાઞ્ચનમપિ ત્વાં ચાનુયાન્ત્યત્યયે ।
સઞ્ચિત્યૈવમિદં ચ મુઞ્ચ સકલં પ્રાપઞ્ચિકં નશ્વરં
મઞ્ચાલી-ગુરુમઞ્ચ શાશ્વત-સુખં ત્વં ચેત્સખે વાઞ્છસિ ॥ ૨॥

ઇષ્ટાર્થાકલનાન્નૃણામિહ તથા કષ્ટાવલેર્વારણાત્
કુષ્ઠાપસ્મૃતિ-પૂર્વ-ભીકર-રુજા-દુષ્ટ-ગ્રહોત્સારણાત્ ।
પ્રેષ્ઠો ભક્તતતેસ્તથા ભગવતઃ પ્રેષ્ઠશ્ચ વાયોર્હરેઃ
શ્રેષ્ઠઃ સંયમિનાં કૃષીષ્ટ કરુણાં શ્રીરાઘવેન્દ્રો ગુરુઃ ॥ ૩॥

યદ્વૃન્દાવન-સમ્પ્રદક્ષિણ-નમસ્કારાઽર્ચનાઽરાધનૈઃ
પઙ્ગુસ્તુઙ્ગ-ગિરીન્દ્ર-શૃઙ્ગમપિ ચોલ્લઙ્ઘેત જઙ્ઘાલકઃ ।
મૂકઃ સ્યાન્મધુ-પાક-કલ્પ-કવિતા-વાકો વિવેકોદયાદ્
જલ્પાકસ્તમહં ભજામિ ગુરુરાટ્ શ્રીરાઘવેન્દ્રં મુનિમ્ ॥ ૪॥

યસ્યાન્તઃકરણં પ્રપૂર્ય કરુણોદ્રિક્તા હિ રિક્તં કરા-
લઙ્કારં ચ કમણ્ડલું કલયતે પૂર્ણં સદાર્ણો-મિષાત્ ।
શાટ્યાં હૃદ્યમિતોદિતઃ પ્રતટિતો લોકાનુરાગઃ પરઃ
કારુણ્યાબ્ધિમગણ્ય-પુણ્ય-લસિતં યત્યગ્રગણ્યં સ્તુમઃ ॥ ૫॥

સ્વર્ણ-શ્રી-મૃગતૃષ્ણિકાઽકુલતયા સ્વાન્તં ન તાન્તં મનાક્
કાન્તા-કામનયા કદાચિદપિ ન ભ્રાન્તં ચ કાન્તારકે ।
વૈ દેહી ન ચ કાઽપિ કોઽપિ ભવતા દૂરીકૃતાઽનાદૃતોઽ
થાપિ ત્વં નનુ રાઘવેન્દ્ર-પદ-ભાક્ કસ્માન્ન વિસ્મીયતે ॥ ૬॥

મુખ્યપ્રાણ-નિવિષ્ટ-ચેતનતયા રામાનુરાગેણ ચ
કાન્ત્યા ભાસુર-લક્ષ્મણાન્વિતતયા સ્નેહાત્ સુમિત્રાદરાત્ ।
ભાસ્વદ્-ભારત-ભાગ્ય-વર્ધનકૃતે સર્વસ્વ-દાનદપિ
સ્વામિંસ્તે ખલુ “રાઘવેન્દ્ર” ઇતિ-યન્નામૈતદન્વર્થકમ્ ॥ ૭॥

સ્થીતે ચૂત-રસે પ્રમાદ-પતિતઃ પોતઃ પરેતઃ કૃપા-
દૃક્પાતેન તદાતિ-શીતલહૃદો જાતઃ પુનર્જીવિતઃ ।
સંસારે વિષયાખ્ય-કશ્મલ-રસે પન્નોઽવસન્નોઽસ્મ્યહં
કિં નોત્થાપયસે ગુરો તવ પુરઃ-ખિન્નં વિષણ્ણં ચ મામ્ ॥ ૮॥

અર્થિ-પ્રાર્થિતદાપિ દિવ્યસુરભિર્નૂનં-પશુત્વાઞ્ચિતા
સોઽયં કલ્પ-મહીતુહોઽપિ જડતાપન્નો હિ માન્યો દિવિ ।
હન્તાશ્મૈવ સ ચિન્તિતેષ્ટ-ફલદશ્ચિન્તા-મણિશ્ચાન્તતઃ
તત્યેનોપમિનોમિ તં ગુરુમતો ખિન્નાઽવસન્ન ચ વાક્ ॥ ૯॥

યત્પાદામ્બુજ-સેવનાત્સુતવતી વન્ધ્યાઽભિનન્ધ્યા ભવેત્
કાણઃ ક્ષીણ-સુદૃક્ ક્ષણાન્નલિન-દૃક્ ચક્ષુષ્મતામગ્રણીઃ ।
કૌબેરીં શ્રિયમાપ્નુયાદપિ દરિદ્રણો જુષાણોંઽજલિં
હીનોઽહીન-શયાન-દેવ-શરણંશ શ્રીરાઘવેન્દ્રં સ્તુમઃ ॥ ૧૦॥

યન્નામ-સ્મરણં ત્રિતાપ-હરણં સૌખ્યાવલેઃ કારણં
યસ્યાઙ્ઘ્રયોર્નમનં વિપત્પ્રશમનં ધ્યાનં નિદાનં મુદામ્ ।
યત્પાદાશ્રયણં શ્રિયો વિતનુતે શશ્વચ્ચ વિશ્રાણનં
યદ્વૃન્દાવન-દર્શનં ભટ ગુરું સર્વાપદાં કર્શનમ્ ॥ ૧૧॥

વેઙ્કુણ્ણસ્ય નિરક્ષરસ્ય ચ ગવાં પાલસ્ય લોલદ્વટોઃ
ન્યસ્તે હસ્ત-તલેઽસ્ય મસ્તક -તટે ધ્વસ્તાસ્સમસ્તાપદઃ ।
કાલે સ્ફૂર્તિ-વેશેષતઃ સમભવદ્ જ્ઞાનોદયસ્તત્ષણાત્
યસ્યોદ્યદ્દયયા શ્રિયસ્સમુદયો ભાગ્યોદયસ્તં ભજે ॥ ૧૨॥

નો સન્ધ્યાચરણં, જપાદિ-કરણં, નો નામ્ન ઉચ્ચારણં
ક્ષેત્રે સઞ્ચરણં, પુરશ્ચરણતોનાકાર્ષ્મવિષ્ણુસ્તવમ્ ।
તન્નોઽદ્યોદ્ધરણં કથં ન્વિતિ ગુરો સર્વાપદુત્તારણં
યાતાસ્તે ચરણં ભિયાદ્ય શરણં મા નઃ કૃથા વારણમ્ ॥ ૧૩॥

સ્વામિન્ નૈક-જનુસ્સમર્જિત-મહા-પાપાવલી સર્વતા-

કારા ભીરુમમુઞ્ચ ભીષયતિ માં કા ભીર્વદાભીક તે ।
હૈમન્તં હિ હિમં પ્રકમ્પયતુ વા કામં તુ ભૌમં જનં
કચ્ચિચ્ચણ્ડરુચો નુ ગણ્ડમધરં શૈત્યેન કિં ખણ્ડયેત્ ॥ ૧૪॥

વ્યાખ્યા યેન કૃતા સુધા-પરિમળાભિખ્યા હિ સઙ્ખ્યાવતા
શ્રીમન્ ન્યાયસુધાકૃતેઃ પરિમળવ્યાખ્યાચયન્નિર્મિતા ।
મધ્વવ્યાસજયાર્ય ભાવમણિસન્મઞ્જૂષિકોદ્ઘાતિની
માન્યા માધ્વ ગુરોર્જયાભિધમુનેઃ પૂર્ણાશયોદ્ભાસ્સિની ।
વ્યાસાર્યસ્ય હિ ચન્દ્રિકા ચ ખલુ યદ્ વ્યાખ્યાનતઃ ખ્યાતિભાક્
વિદ્વત્પ્રખ્ય યતિ પ્રમુખ્ય ગુરુરાટ્ નઃ સૌખ્યદોસ્ત્વન્વહમ્ ॥ ૧૫॥

પ્રત્યૂહ વ્યૂહ તુઙ્ગ ક્ષિતિધર દલનાત્યુગ્રદમ્ભોલિ લીલા-
રમ્ભોજ્જૃમ્ભત્-કટાક્ષેક્ષણ-જનિત-જગત્ક્ષેમ ભૂમાભિરામમ્ ।
શ્રીમદ્રામાઙ્ઘ્રિ-ભક્તેતર-વિષય-વિરક્તીશ-સુજ્ઞાન-પુષ્પ-
સ્તોમાઽસામાયિતાન્તઃકરણ-ગુરુમમું ચૈમિ ભક્ત્યારણં તમ્ ॥ ૧૬॥

વિદ્વચ્ચકો રોત્સવ-કારિ-ચન્દ્રં
કર્મન્દિ-વૃન્દારક-વન્દિતેન્દ્રમ્ ।
નિર્દોષ-રન્ધ્રં સુ-ગુણૈક-સાન્દ્રં
શ્રી-રાઘવેન્દ્રં પ્રણમામ્યતન્દ્રમ્ ॥ ૧૭॥

દેવાસાં નિવહે નિરીક્ષ્ય હિ મયા સમ્યત્ પરીક્ષ્યાઽશ્રિતો
ભક્ત્યા કિં ચ વૃતસ્તુતોઽર્ચિત-નુતઃ શ્રી-રાઘવેન્દ્રો હરિઃ ।
પશ્ચાચ્છ્રીગુરુ-મણ્ડલેઽપિ ચ બહુ-શ્રાન્ત્યા વિચિન્ત્યાઽસકૃત્
માધ્વાધ્વર્ય-ધુરોદ્ધરો યતિ-પતિઃ શ્રીરાઘવેન્દ્રો વૃતઃ ॥ ૧૮॥

નિયતેન્દ્રિય-ચેતસ્યાદ્ નિયતાદ્ ભવતો ગુરોઃ ।
ન યતેઽન્યયતેર્ગન્તું નયતો મુક્તિમાશ્રયમ્ ॥ ૧૯॥

ગુરુણાં ચ તરૂણાં ચ ન સઙ્ખ્યા ભૂતલે પરમ્ ।
ગુરુત્વં સ્વસ્તરુત્વં ચ મિલિત્વૈક્યં ગતં ત્વયિ ॥ ૨૦॥

આશાં વૈષયિકીં વ્યુદસ્ય વનિતા-ભૂ-સ્નેહ-પાશાન્ ગુરૂ-
રાશા-વ્યાપ્ત-યશાઃ શશીવ-ચ-વશી શ્રીશાર્ચનૈક-વ્રતઃ ।
કીશોર્વીશ-યતીશ-રૂપ-મરુતો દાસોઽહમેવં વદન્
આશીર્ભિઃ શમયેન્મમૈષણ-ગણાખ્યાઽશીવિષોત્વેષણમ્ ॥ ૨૧॥

લોકે પાવન-ગુર્વનુગ્રહ-બલાદ્ ભૂ-પાવનં જીવનં
શ્રી-વ્યાસાર્ય-જયાર્ય-વાદિ-ગુરુરાજાનાઞ્જગત્યાંશ્રુતમ્ ।
તેષામન્તિકમેવ ગન્તુ મધુના સ્વાન્તં નિતાન્તં ભય-
ભ્રાન્તં તદ્ ગુરુ-રાઘવેન્દ્ર-કરુણાઽકોપારમેવાશ્રયે ॥ ૨૨॥

પ્રાગાચીર્ણમચીર્ણ-શીર્ણ-દુરિતં તૂર્ણં હિ યત્ ચૂર્ણયેત્
કામ-ક્રોધ-મદાદિ-પાવક-ખર-જ્વાલાશ્ચ યચ્છામયેત્
ચેતો-લગ્ન-કુ-વાસના-પટમપિ છિન્નં વિદધ્યાત્પુનઃ
પ્રાશ્મીહિ પ્રિય-રાઘવેન્દ્ર-યમિનાં પાદોદકં પાવનમ્ ॥ ૨૩॥

યત્પાદોદક-સેવનાત્ કલિયુગે સર્વાવનાત્ પાવનાદ્
રોગા ભોગ ભયાનકાઃ ક્વ નુ ગતા વેગાન્ન તલ્પક્ષ્યતે ।
વ્યર્થં વૈદ્યક-શાસ્ત્રમેતદોભયં પાશ્ચાત્ય-પૌરસ્ત્યકં
સોઽયં શ્રીગુરુ-રાઘવેન્દ્ર-યતિરાટ્ પાયાદપાયાત્સદા ॥ ૨૪॥

નષ્ટ-પ્રાયમપીહ દુષ્ટ-કલિનૈવાસ્તિક્ય મુજ્જીવયન્
નાસ્તિક્યં તિરયંશ્ચ દૈવત-ગુરુ-દ્વેષં ચ નિશ્ચેષયન્ ।
શુષ્યં પુષ્કલ-હૂણ-તુષ્કર-મતૈઃ સમ્પર્કતો ભક્તિસત્-
કેદારં કૃતિ-સદ્રસૈઃ કિસલયન્ યચ્છેદ્ ગુરુઃ સત્ફલમ્ ॥ ૨૫॥

લોકાનાં ફલકેઽલિકે સતિલકે યેનાથવા મસ્તકે
કસ્તૂરી-સદૃશિ પ્રભાતિ ચ સતિ ધ્વસ્તાસ્સમસ્તાપદઃ ।
ભીતાઃ કિં ચ સમીપમેવ યમરાડ્ દૂતા ન ચે યુર્ગુરોઃ
પત્યઞ્જોદિત-પાપ-ભઞ્જક-રજઃ-કિઞ્જલ્ક-પુઞ્જઃ શ્રિયૈ ॥ ૨૬॥

યસ્યાનુગ્રહ લેશતોઽત્ર ભુવનેઽસાધ્યં ન વૈ વિદ્યતે
વ્યઙ્ગઃ પઙ્ગુરલં વિલઙ્ઘિતુમપિ સ્યાત્તુઙ્ગ શૈલં પટુઃ ।
જલ્પાકો રસ પાક વાગ્મુખરિતો મૂકોઽપિ લોકે કવિઃ
તં શ્રીમદ્ ગુરુરાઘવેન્દ્ર યમિનં વન્દે નરં દૈવતમ્ ॥ ૨૭॥

તાપં લોકપતે, શુચં ક્ષમયતે, પાપં હરત્યાશુ યા
દ્રાગ્ દૌરીકુરુતે ચ દુર્મતિમથો તન્દ્રાં કરોતિ દ્રુતામ્ ।
ક્ષેશં નાશયતેઽલિકેઽન્યથયતે દુર્વર્ણમાલાં વિધેઃ
ગુ-ર્વઙ્ઘ્ર-યમ્બુજ મૃત્તિકા મમ શિરઃ ભે કૃત્તિકા સ્યાત્સદા ॥ ૨૮॥

ભાલાભ્યે ફલકે નૃણાં તનુતરે મસ્તે પ્રશસ્તેઽથમા
યત્સન્ધારણતઃ પલાયન-પરા ભૂતાઃ પ્રભૂતા આપિ ।

ભીતા દૂરત એવ દુગ્રહ-ગણા ભાધા ભિયા ધાવિતા
ભૂયાસુર્મમ ભૂયસે ગુરુપદ-શ્રીપાંસવઃ શ્રેયસે ॥ ૨૯॥

વિપન્નં વિષણ્ણં પ્રપન્નં પ્રસન્નો
રુદન્તં વદન્તં વિદન્તં ન કિઞ્ચિત્ ।
લઠન્તં શઠં તં સ્ફુટં તે પદાન્તે
ધરાઽશૂદ્ધરાઽમું હરાઽઘં ગુરો મે ॥ ૩૦॥

આનર્થાન્નિહન્તું પુમર્થાન્ પ્રદાતું
ન યન્ત્રાણિ મન્ત્રા ન તન્ત્રં સ્વતન્ત્રમ્ ।
ન તીર્થાદિ-સર્થં સમર્થં તદર્થે
તીર્થં યથાર્થં ગુરો પ્રાર્થયે ત્વામ્ ॥ ૩૧॥

નૃણામનલ્પ-સઙ્કલ્પગોચરાર્થ-પ્રદાનતઃ ।
કલ્પદ્રુ-કલ્પાન્ વન્દેઽહં રાઘવેન્દ્ર-ગુરૂત્તમાન્ ॥ ૩૨॥

વ્યઙ્ગા વ્યાધિ-હતાઃ ક્ષીણાઃ યસ્યાપાઙ્ગાવલોકનાત્ ।
મઙ્ગલાન્યાપ્નુવન્તીડે તુઙ્ગા-તીરગ-યોગિનમ્ ॥ ૩૩॥

શ્રીરાઘવેન્દ્ર-કરુણા-તરણિર્ભવાબ્ધૌ
શ્રીરાઘવેન્દ્ર-ચરણં શરણં સદા મે ।
શ્રીરાઘવેન્દ્ર-ગુરુણૈવ સનાથિતોઽહં
શ્રીરાઘવેન્દ્ર-ચરણાભરણં શિરો મે ॥ ૩૪॥

ન રાઘવં ગન્તુ મઘાદ્રિરીશે
ન લાઘવાદિન્દ્રમુપૈ તુમીસ્સે ।
તદ્રાઘવેન્દ્રાઙ્ઘ્રિ-યુગાસ્ત્યુપાયં
શ્રીરાઘવેન્દ્રં ગુરુમાશ્રિતોઽહમ્ ॥ ૩૫॥

ઇતિ મહામહોપાધ્યાય પં. પણ્ઢરિનાથાચર્ય ગલગલિ વિરચિતા
શ્રીરાઘવેન્દ્રકરુણાલહરિ એમ્બ આખણ્ડ કાવ્ય સમાપ્તા ।

Encoded and proofread by Sudeep Dalbanjan

*Shri Raghavendra Karunalahari*

pdf was typeset on August 25, 2024

Please send corrections to *sanskrit@cheerful.com*